रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 6

**105** **405 (ICF)**

# 2017

# संस्कृतम्

समय : 3 घण्टे ] [ पूर्णांक : 100

## खण्ड – 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए) –

पुरा वने एकस्मिन् आश्रमे बहवः शिष्याः विद्याध्ययनं कुर्वन्ति स्म। तेषु वरदराजः नाम एकः मन्दमतिः छात्रः आसीत्। सः यत् पठति तत् विस्मरति स्म। सहपाठिनः तस्य उपहासं कुर्वन्ति स्म। एकदा गुरुः तम् अकथयत्– वरदराज ! अहम् सम्यक् रूपेण अपश्यम् यत् त्वं पठितं पाठं किञ्चित् अपि न स्मरसि। अतः त्वं वृथा समयं मा यापय, किञ्चित् अन्यकार्यं कुरु। आत्मसम्मानेन वञ्चितः सः अचिन्तयत्– नूनम् अहं मूर्खः अस्मि। मम भाग्ये विद्या नास्ति।

खिन्नः भूत्वा सः इतस्ततः भ्रमति स्म। मार्गे सः एकं कूपम् अपश्यत्। तत्र अनेकाः महिलाः जलेन घटान् पूरयन्ति स्म। ताः महिलाः यस्यां शिलायां घटं स्थापयित्वा जलं पूरयन्ति स्म तत्र एकः गर्तः अभवत्। एतत् दृष्ट्वा सः अचिन्तयत्–यदि मृत्तिका–घटेन शिलायां गर्तः अभवत् तर्हि पुनः–पुनः अभ्यासेन मम बुद्धिः अपि कथं तीव्रा न भविष्यति।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4 = 2

(i) के विद्याध्ययनं कुर्वन्ति स्म ?

(ii) सहपाठिनः कस्य उपहासं कुर्वन्ति ?

(iii) केन वञ्चितः वरदराजः अचिन्तयत् ?

(iv) मार्गे सः किम् अपश्यत् ?

(ख) संस्कृतस्य पूर्णवाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए)– 1×2 = 2

(i) महिलाः किं कुर्वन्ति स्म ?

(ii) गर्तं दृष्ट्वा सः किम् अचिन्तयत् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए)– 1×4 = 4

(i) 'एकः मन्दमतिः छात्रः आसीत्' अत्र 'आसीत्' पदे कः धातुः ?

(ii) 'पण्डित' इति पदस्य विपरीतार्थकं पदं गद्यांशात् चित्वा लिखत।

(iii) 'यस्याम्' इति पदं कस्यां विभक्तौ प्रयुक्तम् ?

(iv) 'स्थापयित्वा' पदे कः प्रत्ययः प्रयुक्तः ?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिए) 2

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. विजयनगर वास्तव्यः राजशेखरः गोरक्षापुर–निवासिनीम् अग्रजाम् एकं पत्रम् अलिखत्। तस्मिन् पत्रे सः उत्तरप्रदेश माध्यमिक शिक्षा परिषदः द्वादशकक्षायां स्वमण्डले प्रथमस्थानविषये अलिखत्। अस्मिन् पत्रे मञ्जूषातः उचित पदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत– ½×10 = 5

(विजयनगर निवासी राजशेखर ने गोरक्षापुर निवासी बड़ी बहिन को एक पत्र लिखा। जिसमें उत्तर प्रदेश माध्यमिक शिक्षा परिषद् की बारहवीं कक्षा में अपने मण्डल में प्रथम स्थान के विषय में उल्लेख किया। उसके द्वारा लिखे गये पत्र में मंजूषा में दिये गये पदों में से उचित पद लेकर रिक्तस्थान भरते हुए पत्र को पुनः उत्तर पुस्तिका में लिखिए)

| |
|---|
| **मञ्जूषा** – गौरवम्, दातुम्, विजयनगरतः, भवती, प्रथमम्, राजशेखरः, अग्रजायाः, कठोरपरिश्रमेण, वाच्या, भवत्याः |

(i) ....................

तिथि : 15–07–16

पूजार्हायाः (ii) ....................

पादपद्मयोः सादरं प्रणतिः ।

अत्र कुशलं तत्रास्तु। आशासे यदिमं समाचारं प्राप्य (iii) .................... प्रसन्ना भविष्यति, यद् उत्तर–प्रदेश माध्यमिक–शिक्षा परिषदः परीक्षायाम् मया स्वमण्डले द्वादश कक्षायाम् (iv) .................... स्थानं अवाप्तम्। अनेन मम विद्यालयस्य पित्रोश्च (v) .................... अवर्धत्। वार्षिकोत्सवे च विद्यालयस्य प्रधानाचार्य महोदयोऽपि मह्यं पञ्चसहस्ररुप्यकाणि पुरस्काररूपेण (vi) .................... उद्घोषणाम् अकरोत्। विद्यालयस्य सर्वेऽपि शिक्षकाः अतीव प्रसन्नाः अभवन्। परीक्षायां गुरुजनानाम् आशीर्वचोभिः, सतत (vii) .................... च मया प्रथमं स्थानम् प्राप्तम्। आशासे च यद् भविष्येऽपि (viii) .................... आशीर्वादेन इतोऽपि उच्चपदं प्राप्स्यामि। शीघ्रमेव गोरक्षापुरम् आगमिष्यामि। अन्ते च पूज्यायाः मातुः चरणकमलयोः प्रणतिः (ix) ....................।

भवदीयः अनुजः

(x) ....................

| |
|---|
| वेष्टनम्–<br>श्रीमती सुषमा प्रजापतिः<br>75/5 शास्त्री निकेतनम्<br>गोरक्षापुरम्<br>उत्तर प्रदेशः |

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत– ½×10 = 5

(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को भरकर उत्तरपुस्तिका में पुनः लिखिए)

गुजरात राज्ये राजमातुः मृणालिनी देव्याः महती ख्यातिः। एकदा रात्रौ भगवान् सोमनाथः तस्याः (i) .................... प्रत्यक्षीभूय अवदत्–''भवत्या पुण्यकार्यं तु कृतम्, किन्तु तत् सामान्यया निर्धनमहिलया कृतात् पुण्यात् अपि (ii) ....................। मम वचनस्य यथार्थतां ज्ञातुं भवती मम मन्दिरं प्रति समागतायाः निर्धनमहिलायाः (iii) .................... पुण्यं याचतु'' इति।

'अहं तु राजमाता अस्मि। याचना किमर्थं ? प्रभूतं धनं दत्त्वा तस्याः महिलायाः पुण्यमहं क्रेष्यामि' इति (iv) .................... मृणालिनी देवी तस्याः निर्धनमहिलामानेतुं भटान् प्रेषितवती। भटाः ताम् अन्विष्य आनीतवन्तः। ताम् अवदत् राजमाता–''भवती यावत् इच्छेत् तावत् धनम् दास्यामि। स्वस्य पुण्यं (v) .................... ददातु'' इति। तदा सा महिला पुण्यदानं (vi) .................... उक्तवती–''मह्यं धनं न आवश्यकमिति। राजमाता अवदत्–''त्वया अर्जितं तत् पुण्यं कीदृशम् ?'' इति। तदा वृद्धा महिला अवदत्– ''(vii) .................... निर्गता अहं भिक्षायाचनेन उदरं पूरयन्ती शताधिकान् क्रोशान् अतिक्रम्य अत्र आगता अस्मि। केनचित् (viii) .................... पञ्च कदलीफलानि प्रदत्तानि। तेषु द्वे मया (ix) .................... नैवेद्यरूपेण समर्पिते। द्वे च कस्मैचित् दीनाय दत्ते। शिष्टेन एकेन कदलीफलेन (x) .................... कृता। मम पुण्यम् एतावत् एव। भवती तु महाभाग्यवती।

| |
|---|
| **मञ्जूषा** – भक्तेन, निराकुर्वन्ती, पारणा, सकाशात्, गृहात्, विचिन्त्य, स्वप्ने, मह्यम्, अवरम्, भगवते |

4. अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतभाषायां लिखत– 1×5 = 5

(नीचे लिखे किसी एक विषय पर पाँच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए)

(i) अस्माकं देशः (ii) पर्यावरणम् (iii) सत्संगतिः

## खण्ड – 'ग' (अनुप्रयुक्त–व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरुत– 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए)

(i) देहि मे प्रत्युत्तरम्।
(ii) अद्यापि यन्न विहिता।
(iii) संवृत्ते किञ्चिदन्धकारे।
(iv) सौमित्रिणा धनुर्गृहीतम्।
(v) येनाकार्यं करिष्यति।
(vi) बहूक्तम् विरम।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां समास विग्रहाः लेखनीयाः – 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों का समास विग्रह कीजिए)

(i) भोजो राजभवनम् अगात्।
(ii) अपण्डितः खलु भवान्।
(iii) पतिपत्न्यौ त्रिवर्गम् साधयतः।
(iv) सत्याय मितभाषिणाम्।
(v) अतिथिदेवो भव।
(vi) प्रत्यहं किल तदा मतिमाननीयाम्।

7. निम्नलिखितेषु वाक्येषु कोष्ठान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1×8 = 8

(नीचे लिखे वाक्यों में कोष्ठक के अंतर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए)

(i) यथायोग्य एव पदे ................ असि। (नि + युज् + क्त)
(ii) ................ वस्तुतः एव रूपम्। (विद्या + मतुप्)
(iii) दीपप्रकाशे कमपि ................ अवादीत्। (अन् + अव + लोक् + शतृ)
(iv) ................ द्वाः स्थेन क्षम्यतामेष आगच्छामि। (भाष् + शानच्)
(v) मुञ्जः वह्नौ ................ निश्चितवान्। (प्र + विश् + तुमुन्)
(vi) दीपस्य समीपम् ................ संन्यासिनोक्तम्। (आ + गम् + ल्यप्)
(vii) मयैकाकिना किल ................। (गम् + तव्यत्)
(viii) चिरं प्रजाः ................। (पाल् + क्तवतु)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्– 1×5 = 5

(नीचे लिखे वाक्यों में कर्ता और क्रिया की अन्विति कीजिए)

(i) रोदितव्ये ................ सौमित्रिणा धनुर्गृहीतम्। (काले/कालेन)
(ii) यत्कृते ................ क्लेशे राज्ये मे न मनोरथः। (महति/महते)
(iii) अस्माकं सुचरितानि तानि त्वया ................। (उपास्यम्/उपास्यानि)
(iv) दौवारिक ! न मां ................। (प्रत्यभिजानासि/प्रत्यभिजानामि)
(v) हरिश्चन्द्रः पुत्रं जनसङ्कुले आपणे ................। (विक्रीतवान्/विक्रीतवती)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम्–

(नीचे लिखे वाक्यों में विशेष्य–विशेषण की अन्विति कीजिए)

(i) एकेनापि ................ विद्यायुक्तेन साधुना। (सुपुत्राणाम्/सुपुत्रेण)
(ii) राजा च ................ निर्जनं विधाय वत्सराजं प्राह। (सौधम्/सौधे)
(iii) द्वादशवर्षेण ................ अनुगम्यमानः कोऽपि संन्यासी दृष्टः। (भिक्षावटुना/भिक्षावटोः)
(iv) ................ राज्यं पुत्रार्थे यदि याच्यते। (विपणिते/विपणितम्)
(v) यथा भर्तुः ................ भार्या भवति। (सहायी/सहायिनी)

9. अधोलिखितेषु वाक्येषु कोष्ठान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्– 1×5 = 5

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिए)

(i) केवलं महाराजशिववीरस्य आज्ञां ................ वहामः। (शिरस्)
(ii) अतः परं न ................ परिवादं श्रोतुमिच्छामि। (मातृ)
(iii) भोजं गृहाभ्यन्तरे ................ निक्षिप्य रक्ष। (भूमि)
(iv) ................ हस्तेनैव विसर्जितः। (राजन्)
(v) नारी ................ कमपि सहचरम् अपेक्षते। (जीवनयात्रा)

## खण्ड – 'घ' (पठितांश–अवबोधनम् भाग - I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्–"क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः ?

ततो "दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि ?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति" इत्येवं भाषमाणेन द्वाःस्थेन क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालापः–

संन्यासी–कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

दौवारिकः– भगवन् ! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लंध्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) संन्यासी केन अनुगम्यमानः आसीत् ?

(ii) धृततुम्बीपात्रः भव्यमूर्तिः कः आसीत् ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) दौवारिकेण कीदृशः संन्यासी दृष्टः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'अनुगम्यानः' अत्र कः उपसर्गः प्रयुक्तः ?

(ii) 'निरर्थकम्' इत्यर्थे किं पदं प्रयुक्तम् ?

(iii) 'वदसि' इति क्रियापदस्य कर्तृपदं किम् ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

रामः – सुमित्रामातः ! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति। आः अपण्डितः खलु भवान्।
भरतो वा भवेद् राजा वयं वा ननु तत् समम्।
यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम्।।

लक्ष्मणः – न शक्नोमि रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थितः)

रामः – त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।
भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ।।
सुमित्रामातः ! इतस्तावत्।

लक्ष्मणः – आर्य ! अयमस्मि ॥

रामः – भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्। उच्यतामिदानीम्।
ताते धनुर्न मयि सत्यमवेक्ष्यमाणे।
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।
दोषेषु बाह्यमनुजं भरतं हनानि,
किं रोषणाय रुचिरं त्रिषु पातकेषु ।।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) राज्यभ्रंशः किं जनयति ?

(ii) लक्ष्मणः किं कर्तुं न शक्नोति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए) – 1

(i) अत्र स्वधनं हरन्त्या का ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'गच्छामस्तावत्' अत्र 'गच्छामः' इति पदे कः धातुः प्रयुक्तः ?

(ii) 'मातरि' अस्मिन् पदे प्रयुक्ता विभक्तिः का ?

(iii) 'सुमित्रा माता यस्य सः' इत्यस्य समस्तपदं चिनुत।

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं,
पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी।
कांस्यं यथा हि कुरुतेऽतितरां निनादं
तद्वत् सुवर्णमिह नैव करोति नादम् ।।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) निनादं कः कुरुते ? (ii) सुवर्णं किं न करोति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए) – 1

(i) अल्पज्ञः पुरुषः इहलोके किं करोति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'अल्पज्ञः पुरुषः' अस्य क्रियापदं किम् ? (ii) 'नैव' अस्य सन्धि–विच्छेदं कुरुत।

(iii) 'अतितराम्' अस्य विशेष्यपदं किम् ?

13. निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) –

(क) देव ! लोकाः मां सर्वज्ञं कथयन्ति।

(i) इमां पंक्तिं कः कम् प्रति कथयति ? 1+1 = 2

(ख) 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः'।

(i) एषा पंक्तिः कस्मात् ग्रन्थात् संकलिता ? (ii) अस्य ग्रन्थस्य लेखकः कः ? 1+1 = 2

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत– 2+2 = 4

(नीचे लिखे गये क, ख खण्डों में प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए)

(क) आर्य ! नोत्सहे श्लाघनीये काले वारयितुम् अत्र भवती।

**भावार्थ–** (i) अस्मिन् सौम्यसमये सीता वनं यास्यति। (ii) वनगमने समये सीतां वारयितु न कामये।
(iii) आर्य ! वनगमनसमये सीतां वारयितुं न समर्थः।

(ख) "कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः"

**भावार्थ–** (i) कुलगुरुः पितरौ च सभां ज्ञातु गमिष्यावः। (ii) आवां गुरोः पित्रोश्च सम्मानाय गमिष्यावः।
(iii) कुलगुरुः पित्रोः सभायां गमिष्यति।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तभावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत– ½×8 = 4

(नीचे दिये गये श्लोक के भावार्थ को मंजूषा में दिये गये पदों से पूर्ण करके लिखिए)

कर्णामृतं सूक्तिरसं विमुच्य
दोषेषु यत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य
क्रमेलकः कण्टकजालमेव ।।

**भावार्थ–** कर्णयोः आनन्ददायकतया (i) ................ काव्यस्य आनन्दं (ii) ................ दुर्जनानां (iii) ................ प्रयासः दोषोद्–घाटने (iv) ................ उष्ट्रः क्रीडोद्यानं (v) ............. तत्रस्थ सुन्दरं दृश्यं सुन्दराणि (vi) ............. फलानि पुष्पाणि च (vii) .............. स्वभोजनाय स्वकृत्यानुसारं केवलं (viii) ............... एव पुनः पुनः अन्वेषयति।

| मञ्जूषा – विहाय, मधुरम्, गत्वा, भवति, पत्राणि, परित्यज्य, महान्, कण्टकान् |
|---|

15. अधोलिखित श्लोक द्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत–

(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए)

(क) न दुर्जनः सज्जनतामुपैति
शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधा–समुद्रे
न मन्दरो मार्दवमभ्युपैति ।। ½×4 = 2

अन्वयः–सहस्रैः (जनैः) शिक्ष्यमाणः (i) ................ दुर्जनः शठः (ii) ................ न उपैति। (iii) ................ सुधा–समुद्रे (iv) ................ अपि मन्दरः मार्दवं न अभ्युपैति।

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ।। ½×4 = 2

अन्वयः– ज्ञाने मौनं, (i) ................. क्षमा, त्यागे (ii) ................. तस्य (iii) ................. गुणानुबन्धित्वात् सप्रसवा (iv) ................. (आसन्)।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत– 1×4 = 4
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिए)

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) शोकादवचनाद् राज्ञा | (i) हे प्रिय ! मन्दमन्दम्। |
| (ख) प्रजानामेव भूत्यर्थं स ताभ्यो | (ii) हस्तेनैव विसर्जितः। |
| (ग) प्राची यदा हसति | (iii) निमेषमात्रेण भजेद् विनाशम्। |
| (घ) दीर्घ प्रयासेन कृतं हि वस्तु | (iv) बलिमग्रहीत्। |

17. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रसंगानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत– 1×4 = 4
(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचितार्थ कोष्ठकों से चुनकर लिखिए)

(क) राजा सौधं निर्जनं विधाय वत्सराजं प्राह। (शुद्धम्, प्रासादम्, साधुम्)
(ख) कुपात्रे दीयमानं दानं क्षयम् एति। (वनम्, नाशम्, भयम्)
(ग) वनगमननिवृत्तिः पार्थिवस्यैव तावत्। (पार्थस्य, शूरस्य, भूपस्य)
(घ) सर्वोऽप्येवं मृदुः परिभूयते। (तीक्ष्णः, दारुणः, कोमलः)

## खण्ड – 'घ' (संस्कृत साहित्य परिचयः भाग - II)

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत–
(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए)

(क) कवयः 1×3 = 3
(i) भासः
(ii) नारायणपण्डितः
(iii) ईशदत्त शास्त्री
} देशः

(ख) कवयः 1×3 = 3
(i) बिल्हणः
(ii) बल्लालसेनः
(iii) अम्बिकादत्त व्यासः
} कालः

(ग) कवयः 1×4 = 4
(i) भासः
(ii) भर्तृहरिः
(iii) रमाकान्त रथः
(iv) अश्वघोषः
} काऽपि एका रचना

**अथवा**

(क) निम्नांकित वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम्– 1×5 = 5
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिए)
(i) अथर्ववेदस्य ब्राह्मणग्रन्थः ................. अस्ति। (ऐतरेय, गोपथ, शतपथ)
(ii) उपमा कालिदासस्य ................. अर्थगौरवम्। (व्यासस्य, भासस्य, भारवेः)
(iii) गद्यं ................. निकषं वदन्ति। (कवीनाम्, नाटकानाम्, जनानाम्)
(iv) अवस्थानुकृतिः .................। (गद्यम्, पद्यम्, नाट्यम्)
(v) कालिदासस्य ................. प्रमुखाः कृतयः। (सप्त, पञ्च, षट्)

(ख) संस्कृत नाटकानां पञ्चविशेषताः लिखत। 5
(संस्कृत नाटकों की पाँच विशेषताएँ लिखिए)

********